# Shri Subrahmanya Kavacha Vidhih

# શ્રીસુબ્રહ્મણ્યકવચવિધિઃ

## Document Information

Text title : Subrahmanya Kavachavidhi from Kumara tantra

File name : subrahmaNyakavachavidhiH.itx

Category : subrahmanya, kavacha

Location : doc_subrahmanya

Proofread by : Preeti N. Bhandare pnbhandare at gmail.com

Description/comments : Kumaratantra aShTachatvAriMshatpaTalaH 48

Latest update : December 26, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2022

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યકવચવિધિઃ

સુબ્રહ્મણ્યસ્ય કવચં વક્ષ્યેઽહં શ‍ૃણુ કૌશિક ।
સર્વપાપપ્રશમનં સર્વોપદ્રવનાશનમ્ ॥ ૧॥

બ્રહ્માનુષ્ટુપ્છન્દઃ સુબ્રહ્મણ્યસ્ય દેવતા ।
ષાન્તદીર્ઘેણ કલ્પેન ષડઙ્ગન્યાસકલ્પના ॥ ૨॥

ધ્યાનમ્-
સિન્દૂરારુણમિન્દુકાન્તિ વદનં કેયૂરહારાદિભિઃ
    દિવ્યૈરાભરણૈર્વિભૂષિતતનુઃ સ્વર્ગસ્ય સૌખ્યપ્રદમ્ ।
અમ્ભોજાભયશક્તિકુક્કુટધરં રક્તાઙ્ગરાગોજ્વલં
    સુબ્રહ્મણ્યમુપાસ્મહે પ્રણમતાં ભીતિપ્રણાશોદ્યતમ્ ॥ ૩॥

સુબ્રહ્મણ્યોઽગ્રતઃ પાતુ સેનાનીઃ પાતુ પૃષ્ઠતઃ ।
ગુહો માં દક્ષિણે પાતુ ભૂપતિઃ પાતુ વામતઃ ॥ ૪॥

શિરઃ પાતુ મહાસેનઃ સ્કન્દો રક્ષેલ્લલાટકમ્ ।
નેત્રયોર્દ્વાદશાક્ષશ્ચ શ્રોત્રં રક્ષતુ વિશ્વભૂઃ ॥ ૫॥

મુખં મે ષણ્મુખઃ પાતુ નાસિકાં મકરાત્મજઃ ।
ઓષ્ઠં વલ્લીપતિઃ પાતુ જિહ્વાં પાતુ ષડક્ષરઃ ॥ ૬॥

દેવસેનાપતિર્દન્તાન્ ચિબુકં બહુલાસુતઃ ।
કણ્ઠં તારકજિત્પાતુ બાહું દ્વાદશબાહુમાન્ ॥ ૭॥

હસ્તૌ શક્તિધરઃ પાતુ વક્ષઃ પાતુ શરોદ્ભવઃ ।
હૃદયં બ્રહ્મભૂઃ પાતુ કુક્ષિં પાત્વમ્બિકાસુતઃ ॥ ૮॥

નાભિં શમ્ભુસુતઃ પાતુ કટિં પાતુ હરાત્મજઃ ।
ઊરું પાતુ ગજારૂઢો જાનૂ દ્વે જાહ્નવીસુતઃ ॥ ૯॥

જઙ્ઘે વિશાખો મે પાતુ પાદયોઃ શિખિવાહનઃ ।

સર્વાણ્યઙ્ગાનિ ભૂતેશઃ સપ્તધાતૂંશ્ચ ષણ્મુખઃ ॥ ૧૦॥

સન્ધ્યાકાલે નિશીથિન્યાં મધ્યાહ્ને દુસ્તરે જલે ।
દુર્ગમે ચ મહારણ્યે રાજદ્વારે સહાયકે ॥ ૧૧॥

તુમુલે રણમધ્યે ચ સર્પદુષ્ટમૃગાદિષુ ।
ચોરાદિસાધ્વસેઽભેદ્યે જ્વરાદિવ્યાધિપીડિતે ॥ ૧૨॥

દુષ્ટગ્રહાદિભીતૌ ચ દુર્નિમિત્તાદિભીષણે ।
અસ્ત્રશસ્ત્રનિઘાતેષુ ત્રાતુ માં ક્રૌઞ્ચરન્ધ્રકૃત્ ॥ ૧૩॥

સુબ્રહ્મણ્યસ્યકવચમિષ્ટસિદ્ધિફલં ભવેત્ ।
તસ્ય તાપત્રયં નાસ્તિ સત્યં સત્યં વદામ્યહમ્ ॥ ૧૪॥

ધર્માર્થી લભતે ધર્માનર્થાર્થી ચાર્થમાપ્નુયાત્ ।
કામાર્થી લભતે કામાન્ મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ॥ ૧૫॥

યત્ર યત્ર જપેત્ તત્ર તત્ર સન્નિહિતો ગુહઃ ।
પૂજાપ્રતિષ્ઠાકાલે ચ જપકાલે પઠેદિદમ્ ॥ ૧૬॥

તેષામેવ ફલાવાપ્ત્યૈ મહાપાતકનાશનમ્ ।
યઃ પઠેચ્છૃણુયાદ્ભક્ત્યા નિત્યં દેવસ્ય સન્નિધૌ ।
સર્વાન્ કામાનિહ પ્રાપ્ય સોઽન્તે સ્કન્દપુરં વ્રજેત્ ॥ ૧૭॥

ઇતિ શ્રીકુમારતન્ત્રે સુબ્રહ્મણ્યકવચવિધિર્નામ અષ્ટચત્વારિંશત્પટલઃ । ૪૮

Proofread by Preeti N Bhandare pnbhandare at gmail.com

*Shri Subrahmanya Kavacha Vidhih*
pdf was typeset on December 26, 2022

Please send corrections to *sanskrit@cheerful.com*